# Shri Vinayaka Stavaraja

# શ્રીવિનાયકસ્તવરાજઃ

## Document Information

Text title : Vinayaka Stavaraja

File name : vinAyakastavarAjaH.itx

Category : ganesha, stavarAja

Location : doc_ganesha

Proofread by : Sreenivasa Rao Bhagavatula

Description-comments : From stotrArNavaH 01-07

Latest update : February 13, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 13, 2021

*sanskritdocuments.org*

# શ્રીવિનાયકસ્તવરાજઃ

બીજાપૂરગદેક્ષુકાર્મુક રુજા ચક્રાબ્જપાશોત્પલ-
   ત્રીહ્યગ્રસ્વવિષાણરત્નકલશપ્રોદ્યત્કરામ્ભોરુહઃ ।
ધ્યેયો વલ્લભયા સપદ્મકરયાશ્લિષ્ટોજ્જ્વલદ્ભૂષયા
   વિશ્વોત્પત્તિવિપત્તિસંસ્થિતિકરો વિઘ્નેશ ઇષ્ટાર્થદઃ ॥ ૧॥ (વિઘ્નોવિશિષ્ટાર્થદઃ)

નમસ્તે સિદ્ધિલક્ષ્મીશ ગણાધિપ મહાપ્રભો ।
વિઘ્નેશ્વર જગન્નાથ ગૌરીપુત્ર જગત્પ્રભો ॥ ૨॥

જય વિઘ્નેશ્વર વિભો વિનાયક મહેશ્વર ।
લમ્બોદર મહાબાહો સર્વદા ત્વં પ્રસીદ મે ॥ ૩॥

મહાદેવ જગત્સ્વામિન્ મૂષિકારૂઢ શઙ્કર ।
વિશાલાક્ષ મહાકાય માં ત્રાહિ પરમેશ્વર ॥ ૪॥

કુઞ્જરાસ્ય સુરાધીશ મહેશ કરુણાનિધે ।
દશબાહો મહારાજ મહાવક્ત્ર ચતુર્ભુજ ॥ ૫॥

શૂર્પકર્ણ મહાકર્ણ ગણનાથ પ્રસીદ મે ।
માતુલુઙ્ગધર સ્વામિન્ ગદાચક્રસમન્વિત ॥ ૬॥

શઙ્ખશૂલસમાયુક્ત બીજાપૂરસમન્વિત ।
ઇક્ષુકાર્મુકસંયુક્ત પદ્મહસ્ત પ્રસીદ મે ॥ ૭॥

નાનાભરણસંયુક્ત રત્નકુમ્ભકર પ્રભો ।
સર્ગસ્થિતિલયાધીશ પરમાત્મન્ જય પ્રભો ॥ ૮॥

અનાથનાથ વિશ્વેશ વિઘ્નસઙ્ઘવિનાશન ।
ત્રયીમૂર્તે સુરપતે બ્રહ્મવિષ્ણુશિવાત્મક ॥ ૯॥

ત્રયીગુણ મહાદેવ પાહિ માં સર્વપાલક ।
અણિમાદિગુણાધાર લક્ષ્મીભૂવિષ્ણુપૂજિત ॥ ૧૦॥

ગૌરીશઙ્કરસમ્પૂજ્ય જય ત્વં ગણનાયક ।
રતિમન્મથસંસેવ્ય મહીભૂદારસંસ્તુત ॥ ૧૧॥

સિદ્ધ્યાઋદ્ધ્યામોદાદિસંસેવ્ય મહાગણપતે જય ।
શઙ્ખપદ્માદિસંસેવ્ય નિરાલમ્બ નિરીશ્વર ॥ ૧૨॥

નિષ્કલઙ્ક નિરાધાર પાહિ માં નિત્યમવ્યય ।
અનાદ્ય જગતામાદ્ય પિતામહસુપૂજિત ॥ ૧૩॥

ધૂમકેતો ગણાધ્યક્ષ મહામૂષકવાહન ।
અનન્તપરમાનન્દ જય વિઘ્નેશ્વરેશ્વર ॥ ૧૪॥

રત્નસિંહાસનાસીન કિરીટેન સુશોભિત ।
પરાત્પર પરેશાન પરપૂરુષ પાહિ મામ્ ॥ ૧૫॥

નિર્દ્વન્દ્વ નિર્ગુણાભાસ જપાપુષ્પસમપ્રભ ।
સર્વપ્રમથસંસ્તુત્ય ત્રાહિ માં વિઘ્નનાયક ॥ ૧૬॥ (સર્વપ્રથમ્)

કુમારસ્ય ગુરો દેવ સર્વૈશ્વર્યપ્રદાયક ।
સર્વાભીષ્ટપ્રદ સ્વામિન્ સર્વપ્રત્યૂહનાશક ॥ ૧૭॥

શરણ્ય સર્વલોકાનાં શરણાગતવત્સલ ।
મહાગણપતે નિત્યં માં પાલય કૃપાનિધે ॥ ૧૮॥

એવં શ્રીગણનાથસ્ય સ્તવરાજમનુત્તમમ્ ।
યઃ પઠેચ્છૃણુયાન્નિત્યં પ્રત્યૂહૈઃ સ વિમુચ્યતે ॥ ૧૯॥

અશ્વમેધસમં પુણ્યફલં પ્રાપ્નોત્યનુત્તમમ્ ।
વશીકરોતિ ત્રૈલોક્યં પ્રાપ્ય સૌભાગ્યમુત્તમમ્ ॥ ૨૦॥

રમતે દેવકન્યાભિઃ સ નિત્યં સાધકોત્તમઃ ।
સર્વાન્ ભોગાન્ પ્રભુઙ્ક્તેઽસૌ દુર્લભાંશ્ચ દિને દિને ॥ ૨૧॥

સર્વાભીષ્ટમવાપ્નોતિ શીઘ્રમેવ સુદુર્લભમ્ ।
મહાગણેશસાન્નિધ્યં પ્રાપ્નોત્યેવ ન સંશયઃ ॥ ૨૨॥

॥ ઇતિ શ્રીરુદ્રયામલે શ્રીવિનાયકસ્તવરાજઃ સમ્પૂર્ણઃ ॥

Proofread by Sreenivasa Rao Bhagavatula

*Shri Vinayaka Stavaraja*

pdf was typeset on February 13, 2021

Please send corrections to *sanskrit@cheerful.com*